# लिङ्गाष्टकं

ब्रह्म मुरारि सुरार्चित लिङ्गम् निर्मल भासित शोभित लिङ्गम् ।
जन्मजदुःख विनाशक लिङ्गम् तत् प्रणमामि सदाशिवलिङ्गम् ॥ १॥

देव मुनिप्रव रार्चित लिङ्गम् कामदहन करुणाकर लिङ्गम् ।
रावण दर्प विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ २॥

सर्व सुगन्धि सुलेपित लिङ्गम् बुद्धिवि वर्धन कारण लिङ्गम् ।
सिद्ध सुरासुर वन्दित लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ३॥

कनक महामणि भूषित लिङ्गम् फनिपति वेष्टित शोभित लिङ्गम् ।
दक्षसुयज्ञ विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ४॥

कुङ्कुम चन्दन लेपित लिङ्गम् पङ्कज हार सुशोभित लिङ्गम् ।
सञ्चित पाप विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ५॥

देव गणार्चित सेवि तलिङ्गम् भावैर् भक्ति भिरेव च लिङ्गम् ।
दिनकर कोटि प्रभाकर लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ६॥

अष्ट दलोपरि वेष्टित लिङ्गम् सर्वसमुद् भव कारण लिङ्गम् ।
अष्टदरिद्र विनाशित लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ७॥

सुरगुरु सुरवर पूजित लिङ्गम् सुरवनपुष्प सदार्चित लिङ्गम् ।
परात्परं परमात्मक लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ८॥

लिङ्गाष्टकमिदं पुण्यं यः पठेत् शिव सन्निधौ ।
शिवलोक मवाप्नोति शिवेन सह मोदते ॥